कारित्वम् प्रसङ्गत्वन्तु सङ्गतित्वे सत्युपोद्घातादिभिन्नत्वम् "स्मृतस्य उपेक्षानर्हत्वं प्रसङ्ग" इति प्रवादेऽपि स्मृतत्वमनन्तराभिधानप्रयोजकस्मृतिविषयत्वम् उपेक्षानर्हत्वञ्च प्रसङ्गलक्षणोपेक्षा एव उपोद्घातादयस्तदन्यत्वं तेन ततोऽपि प्रागुक्तस्यैवार्थस्य लाभः" इति न्यायमतम् । वेदान्तिमते तु सङ्गतिस्त्रिविधा "शास्त्रेऽध्याये तथा पादे न्यायसङ्गतयस्त्रिधा। शास्त्रादिविषये ज्ञाते तत्तत्सङ्गतिरूह्यताम्" । शास्त्रप्रतिपाद्यमध्यायप्रतिपाद्यं पादप्रतिपाद्यमर्थमवगम्य शास्त्रसङ्गतिरध्यायसङ्गतिः पादसङ्गतिश्च तिस्रः सङ्गतय ऊहितुं शक्यन्ते इति तदर्थः । तत्र "शास्त्रं ब्रह्मविचाराख्यमध्यायाः स्युश्चतुर्विधाः । समन्वयाविरोधौ द्वौ साधनं च फलं तथा" ब्रह्मविचाराख्यशास्त्रस्य प्रथमेनाध्यायेन समन्वयः, (सर्व्वेषां वेदान्तानां ब्रह्मणि तात्पर्य्येणावधारणम्) प्रतिपाद्यते । द्वितीयेन अविरोधः । तृतीयेन साधनम् चतुर्थेन फलम् । इत्येवमध्यायार्थाः एवमेषां प्रतिपाद्यमुक्त्वा षोड़शपादप्रतिपाद्यानर्थानभिधाय। "ऊहित्वा सङ्गतीस्तिस्रो याश्चावान्तरसङ्गतीः तत्र आक्षेपदृष्टान्तप्रत्युदाहरणादिकाः । पूर्व्वपक्षस्य सिद्धान्त युक्तिं वीक्ष्य परे नये । पूर्व्वपक्षोक्तयुक्तिं च तत्राक्षेपादि योजयेत्" इति वेदा०न्या०मा० अवान्तरसङ्गतिस्त्वनेकधा । आक्षेपसङ्गतिर्दृष्टान्तसङ्गतिः प्रसाङ्गिकसङ्गतिरित्येवमादि । उदाहृतञ्च तत्रैव तद्यथा प्रथमाधिकरणे ब्रह्मविचारशास्त्रमारम्भणीयमिति सिद्धान्तः । तत्र युक्तिः ब्रह्मणः संदिग्धत्वमिति । द्वितीयाधिकरणस्य जगज्जन्मादि ब्रह्मलक्षणं न भवतीति पूर्व्वपक्षः तत्र युक्तिः जन्मादेर्जगन्निष्ठत्वादि । तदुभयमवलोक्य तयोराक्षेपसंगतिं योजयेत् । संदिग्धत्वाद्ब्रह्म विचार्य्यमित्ययुक्तं जन्मादेरन्यनिष्ठत्वेन ब्रह्मणोलक्षणत्वाभावे सति ब्रह्मैव नास्ति कुतस्तस्य संदिग्धत्वं विचार्य्यत्वं वेत्याक्षेपसंगतिः । दृष्टान्तप्रत्युदाहरणसङ्गती अपि योजयितुं शक्येते । यथा संदिग्धत्व हेतुना ब्रह्मणो विचार्य्यत्वं तथा जन्माद्यन्यनिष्ठत्व हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टान्तसंगतिः । यथा विचार्य्यत्वे हेतुरस्ति न तथा लक्षणसद्भावहेतुं पश्याम इति प्रत्युदाहरणसंगतिः । एते दृष्टान्तप्रत्युदाहरणसंगती सर्व्वत्र सुलभे पूर्वाधिकरणसिद्धान्त इवोत्तराधिकरणपूर्व्वपक्षे हेतुमत्त्वसाम्यस्योत्तराधिकरणसिद्धान्ते हेतुशून्यत्ववैलक्षण्यस्य च मन्दैरप्युत्प्रेक्षितुं शक्यत्वात् । आक्षेपसंगतिर्यथायोगमुन्नेया। प्रासङ्गिकसंगति रुन्नीयते । देवताधिकरणस्याधिकारविचाररूपत्वात्समन्वयाध्याये ज्ञेयब्रह्मवाक्यविषये तृतीयपादे च संगत्यभावेऽपि बुद्धिस्थावान्तरसंगतिरस्ति । तथाहि पूर्व्वाधिकरणेऽङ्गुष्ठमात्रवाक्यस्य ब्रह्मपरत्वादङ्गुष्ठमात्रत्वं ब्रह्मणो मनुष्यमात्रहृदयापेक्षं मनुष्याधिकारत्वाच्छास्त्रस्येति उक्तम् तत्प्रसङ्गेन देवताधिकरणं बुद्धिस्थम् सेयं प्रासङ्गिकी संगतिः । तदेवं न्यायसंगतिर्व्युत्पादिता" । एवं मीमांसासङ्गतिरपि अधिकरणमालायां दृश्या विस्तरभयान्नोक्ता ईदृशसङ्गत्यभावेऽसङ्गतिः । २असम्बन्धमात्रे ३अर्थालङ्कारभेदे च अलङ्कारशब्दे ३९४ पृष्ठे दृश्यः । [२तच्छून्ये त्रि० ।

**असङ्गम** पु० अभावे न०त०। १सङ्गाभावे मेलनाभावे न०त०

**असङ्गिन्** त्रि०सन्ज—घिनुण् न०त० । सम्बन्धशून्ये "संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्" वे० परि० ।

**असच्छास्त्र** न०असत् असद्विषयकत्वेनानिष्टप्रयोजकम् शास्त्रम्। बौद्धागमे । तस्यासदर्थप्रतिपादकत्वात् वैदिकधर्म्मविरुद्धार्थकत्वाच्च तथात्वम्। "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरमित्यादिनां तेषामीश्वरानङ्गीकारेण चासत्त्वं ज्ञेयम्"।

**असज्जन** पु० विरोधे न०त० । सज्जनभिन्ने दुर्जने "न मामसज्जनेनार्य्या समानयितुमर्हसि" रामा० ।

**असञ्ज्ञा** स्त्री अभावे न०त०। १संज्ञाभावे न०ब० । संज्ञाशून्ये त्रि० । संज्ञा च ज्ञानं नाम इङ्गितादिज्ञापनञ्च तेषामभावः । "तेभ्योऽसञ्ज्ञां चकार" शत०ब्रा० ।

**असत्** त्रि० अस+शतृ न०त०। १सद्भिन्ने, निरुपाख्ये निःस्वरूपे निषेधरूपेण प्रतीयमाने, २अभावत्वाश्रये, "अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् । असदित्युच्यते पार्थे"ति गीतोक्ते अश्रद्धया कृते ३होमादौ च ।४इन्द्रे पु०।५दुराचारिणि असाधौ त्रि० "नच सत् नासदुच्यते" गीता।स्त्रियां ङीप् सा च ६कुलटायाम् । "परितस्तार रवेरसत्यवश्यम्" माघः नामरूपाभ्यामव्याकृते कारणात्मनास्थिते सूक्ष्मरूपे ६अव्यक्ते, च "असदेवाग्र आसीत्" कथमसतः सज्जायेत" च इति छा०उप० बौद्धागमसिद्धं सत्त्वमर्थक्रियाकारित्वम् तच्छून्ये ७अकिञ्चित्करे अभावादौ८अविद्यमाने "नासतो विद्यते भावः" इति यत्तत् सदसतोः परमिति च" गीता "विभेदजनकाज्ञाने नाशमात्यन्तिकं गते । आत्मनो-ब्रह्मणोऽभेदमसन्तं कः करिष्यति" संक्षे०शा० ।

**असत्कर्म्मन्** न० कर्म्म० । १वेदादिशास्त्रनिषिद्धे दुष्कर्म्मणि न सत् कर्म्म यस्य । २साध्वाचारशून्ये त्रि०स्त्रियां डाप्,